ये जीवन्ति शतं समाः

लक्ष्मीप्रसाद बरालः (फलितज्योतिषाचार्यः)

उप-प्राध्यापक, नेपाल-संस्कृत-विश्वविद्यालयः

नेपाल ।

लेख परिचय

संसारका सबै मानिसलाई सुखपूर्वक दीर्घ जीवन बाँच्ने अभिलाषा हुन्छ । त्यसैले परापूर्व कालदेखि नै सुखी र दीर्घ जीवनको चिन्तन हुँदै आएको पाइन्छ। संसारका सबै दर्शन तथा ज्ञान–विज्ञानका चिन्तन र वैज्ञानिक आविष्कारहरू सुखी र दीर्घ जीवनका विषयमा केन्द्रित हुँदै आएका छन्।

आधुनिक कालमा शिक्षा र चेतनाको विकासका साथै जीवनशैली पनि सभ्य र सुसंस्कृत बन्दै गएको मानिन्छ। तर मानव जीवन अपेक्षाकृत सुखी र दीर्घ बन्न सकेको छैन। आकस्मिक विपत्ति र सम्भावित जोखिमबाट जीवनलाई बचाउने सत्प्रयासहरू अहिले पनि निरन्तर भइरहेका छन्।

प्राच्य वाङ्मयमा दीर्घायुष्यको सर्वाधिक चिन्तन वैदिक कालमा भएको पाइन्छ । वेदमा ब्रह्माण्डका सम्पूर्ण सृष्टि संरचना र जीवनचक्रको विराट चिन्तन छ। वेदका विभिन्न सूक्त र मन्त्रहरूमा सुखपूर्वक सय वर्षभन्दा धेरै बाँच्ने आधार, प्रेरणा र सङ्कल्पित वाक्यहरू प्रयोग भएका छन्।

वेदका ६ अङ्गमध्ये ज्योतिषशास्त्रलाई वेदपुरुषको आँखा अर्थात् दृष्टिका रूपमा लिने गरिन्छ । कालगणना र प्रत्येक कालखण्डको प्रभाव मूल्याङ्कन गर्ने शास्त्रका रूपमा ज्योतिषशास्त्रलाई लिने गरिन्छ। आकाशमा देखिने ग्रह–नक्षत्रको प्रभावले प्रत्येक कालखण्डमा उत्पत्ति हुने मानवलगायत जीवमाथि पर्ने प्रभावको लेखाजोखा गरी आयुष्य अनुमान गर्ने पद्धति ज्योतिषशास्त्रमा छ।

वेद कर्मप्रधान भएकाले कर्मको प्रभावका रूपमा पनि जीवनलाई व्याख्या गर्ने गरिन्छ। विगतको कर्मसञ्चयले प्रारब्ध निश्चित हुने र प्रारब्धका आधारमा भावी कर्म गतिशील बन्ने सञ्चित, प्रारब्ध र क्रियमाण कर्मको चक्रलाई पनि सुख र आयुसँग जोडेर हेर्ने गरिन्छ। जन्म–जन्मान्तरको सत्कर्म, सदाचार, साधना र परिष्कृत जीवनशैलीले मात्र मानवदेहमा शतायुसम्म आत्माको वास रहने पूर्वीय चिन्तन र विश्वास छ। त्यसैले यस जन्ममा गरिएको साधना र सदाचारलाई मात्र मानवजीवन सय वर्ष लामो हुने आधार मान्न नसकिने तथ्यलाई शास्त्रहरूले अनुमोदन गरेको पाइन्छ।

पूर्वीय वाङ्मय र चिन्तन परम्पराको आलोकमा सुख–दुःख र आयुष्यलाई भिन्न तर एक–अर्काका पूरकका रूपमा लिन सकिन्छ। व्यवहारमा पनि आजीवन सन्तोषले बाँच्नेहरू सुखी र दीर्घायु भएका उदाहरण प्राप्त भएका छन्। 'ये जीवन्ति शतं समाः' अर्थात् 'जो सय वर्ष जीवित रहन्छन्' शीर्षकको प्रस्तुत लेखमा सय वर्ष लामो जीवन प्राप्त गर्ने केही भाग्यमानी व्यक्तित्वहरूको जन्मकुण्डलीमा दीर्घायुसम्बन्धी ज्योतिषशास्त्रीय आधार खोज्ने प्रयत्न गरिएको छ।

अध्ययनार्थ आफ्ना अभिभावकको जन्मकुण्डली उपलब्ध गराई यो लेख तयार पार्न प्रेरणा प्रदान गर्नुहुने सबै सहयोगी जनहरूमा हार्दिक आभार व्यक्त गर्दछु। विस्तारभयले कुण्डलीको विस्तृत अध्ययन सीमाङ्कित बने पनि थप अनुसन्धानका लागि लेखको विषय उपयोगी र व्यवहारमा समेत प्रेरणादायी बन्नेछ भन्ने आशा लिएको छु।

१. **विषयप्रवेशः**

'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः'[१] इति श्रुतिवचनात् प्राणिनां रक्षकः प्राणः। 'प्राणो हि भूतानामायुः।'[२] यदा प्राणः शरीरं त्यजेत्तदा प्राणभृद् गतायुर्भवत्येव। आयुर्जीवितकालः। आयुषः समाप्तौ प्राणाभावादस्माकं शरीरं निर्जीवत्वं प्राप्नोति। तेन श्रुतौ प्राणस्यापरं नाम गोपः इति। गोपायति रक्षतीति गोपः। पुनः 'सर्वं हीदं प्राणेनाऽऽवृतम्' इत्युक्तेश्चाभिप्रायः प्राण एव जीवनस्य कारणमिति।

पुनरपि श्रुतौ– '...सर्वाणि भूतानि आपिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात्'[३] इत्यनेन गजादिस्थूलकायादारभ्य पिपीलिकापर्यन्तानां जीवानां शरीरे प्राणोऽवतिष्ठते। परन्तु सर्वेषां प्राणभृतां मरणं निश्चितमेव। जातस्य हि ध्रुवो मृत्युरिति तथ्यवचनाज्जातस्य मरणं स्वभावसिद्धम्। किन्तु न निश्चितं जीवनम्, नैव स्वभावसिद्धम्। एकस्मिन् दिने जीवितस्य मरणं भवत्येव। तदाकस्मिकं भवति। तस्य निवारणं न सम्भवति। तत् परिहर्तुं न केनापि शक्यते। तथैव कस्यचित् प्राणमोक्षणं केन निमित्तेन कदा स्यादित्यपि नैव निश्चेतुं शक्यते, केवलमनुमीयते शास्त्रसाहाय्येनास्माभिः।

सर्वे जनाश्चिरकालपर्यन्तं जीवितुमिच्छन्ति। शतायुश्चिरजीवनमिति वैदिक–सूक्त्यभिप्रायोऽपि दृश्यते। तद्यथा– 'पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्'[४] इति, 'कुर्वन्नेवेह कर्माणि

---

१ कल्याण, वेदकथाङ्क, (कौषीतक्युपनिषद् १।२), पृ. ६३४।

२ तैत्तिरीयोपनिषद् १८।१।

३ कल्याण, पूर्ववत्, (ऐतरेय आरण्यक २।१।६), पृ. ६३४।

४ शुक्लयजुर्वेदः ३६।२४।

जिजीविषेच्छतं समाः'[५] इति च । 'शतायुर्वै पुरुषः' इत्युक्तेश्चाभिप्रायोऽपि मानवजीवनं शतवार्षिकमेव । परञ्च सम्प्रति सर्वेषां जीवनं शतवार्षिकं न भवति । कोटिषु जनेष्वप्यङ्गुलिगण्याः केचन भाग्यवन्तो जना एव शतवार्षिकं जीवनं प्राप्नुवन्ति ।

२. आयुष्यहेतुः

'आयुः पूर्वं परीक्षेत पश्चाल्लक्षणमादिशेत्' इति वचनाज्जन्मकुण्डल्यां शुभाशुभयोगविचारात्पूर्वमायुःपरीक्षणं करणीयम् । इह संसारे जायमानानां प्राणिनां कृते विधात्रा पूर्वमेवायुर्निर्धारणं कृतं भवतीति लोकैर्मन्यते-

विधात्रा लिखिता यस्य ललाटेऽक्षरमालिका॥
दैवज्ञस्तां पठेन्नित्यं होरानिर्मलचक्षुषा ॥[६]

तथैवोक्तम्-

आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥[७]

जन्मायुर्भोगः कर्माधीनो भवति । कर्माणि प्रारब्ध-क्रियमाण-सञ्चितभेदैस्त्रिविधानि सन्ति । तत्र पूर्वार्जितकर्मफलरूपेणैव मनुष्ययोनिः प्राप्यते । स्वकर्मणामनुगुणं नरो जायते । तत्रापि शुभाशुभकर्मानुरोधेन ह्युत्तमाधममध्यमकुलप्राप्तिर्भवति । 'कर्मणा बध्यते जन्तुः', 'पुण्यापुण्यकर्माशयः काम-लोभ-मोहप्रसवः'[८] इत्यादिशास्त्रवचनात् कर्म एव मनुष्याणां बन्धनहेतुः । जीवस्य जीवितसमये निजकारणादेवाऽऽरोहणमवहरोहणञ्च भवति । निजकर्मफलानुसारेण जातकाः सुखदुःखभागिनो भवन्ति । तथैव कर्मफलरूपिणौ लाभालाभौ, जयाजयौ । तेन निजकर्मविपाकैस्तेषामायुर्भोगादीनां निर्धारणं करोति विधाता ।

ललाटपट्टे लिखिता विधात्रा
षष्ठीदिने याऽक्षरमालिका च ।
तां जन्मपत्रीं प्रकटां विधत्ते
दीपो यथा वस्तु घनान्धकारे ॥[९]

५ कल्याण, उपनिषद् अङ्क, (ईशावास्योपनिषद् १।२), पृ. १६४ ।

६ सारावली २।१ ।

७ नारायणपण्डितकृतः हितोपदेशः, प्रस्ताविका, श्लो. २७ ।

८ कल्याण, ज्योतिषतत्त्वाङ्क, पृ. ४९२ ।

९ मानसागरी १।१० ।

जन्मनः दिग्देशकालादीनाधारीकृत्य निर्मिता जन्मपत्रिका एवाऽऽयुष्यकर्मादीनां फलानि प्रकटयति। तेन जातकस्याऽऽयुष्यकर्मादीनां शुभाशुभफलानि शास्त्रोक्तविधिना जन्मकुण्डल्याम् अन्वेषणीयानीति शास्त्रनिर्देशो वर्तते–

'यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पङ्क्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥'[१०]

आदित्यादिग्रहाः सर्वे विधातुर्विधानं परिपालयन्तो निजरश्मिजाले कर्मविपाकान् लोके व्यञ्जयन्ति। तेनाखिलसंसारे ग्रहा एव कालनियामकाः कर्मफलविधायकाश्चेत्यतस्त एवायुर्विधानं कुर्वन्तीति मन्यते लोकैः।

ग्रहाधीनं जगत्सर्वं ग्रहाधीना नरा वराः।
कालज्ञानं ग्रहाधीनं ग्रहाः कर्मफलप्रदाः॥[११]

३. आयुर्भेदाः

ज्यौतिषशास्त्रस्य जातकग्रन्थेषु जीवितकालानुसारेण आयुर्भेदाः षट् सन्ति–

३. १. अनायुः-

येषाम् आयुर्नास्ति त एव अनायुषः। जन्मकालादचिरेण मरणादेतेषाम् आयुर्न भवति। विभिन्नग्रन्थेषु हीनायुः, सद्योमरणम्, तत्कालमरणम्, तत्क्षणमरणम्, शीघ्रमरणमित्यादिशब्दैरनायुषां लक्षणं सूचितं वर्तते।

३. २. अल्पायुः-

स्वल्पायुः, अचिरायुः, तुच्छायुरित्यादिशब्दैरल्पायुषो व्यवह्रियन्ते। शास्त्रानुसारं द्वात्रिंशद् वर्षपर्यन्तम् एतेषाम् आयुः।[१२] अल्पायुषोऽपि त्रयो भेदाः सन्ति। तत्र अष्टौ समा बालारिष्टम्, ततो विंशतिवर्षपर्यन्तं योगारिष्टम्, ततः परम् अल्पायुषं अल्पायुष्यं भवति।[१३]

---

१० लघुजातकम् १।२।

११ कल्याण, ज्योतिषतत्त्वाङ्क, (बृहस्पतिसंहिता १।८), पृ. २२।

१२ *अष्टौ बालारिष्टमादौ नराणां योगारिष्टं प्राहुराविंशतिः स्यात्।*
अल्पं चाद्वात्रिंशतान्मध्यमायुरासप्तत्याः पूर्णमायुः शतान्तम्॥ जातकपारिजातः ४।३।

१३ *बालारिष्टे समा अष्टौ योगारिष्टे च विंशतिः*
द्वात्रिंशद् वत्सरा अल्पे चतुःषष्टिश्च मध्यमे॥ बृहत्पाराशरहोराशास्त्रम्, आयुर्दायाध्यायः।

३. ३. मध्यायुः-

अल्पादधिकं दीर्घान्न्यूनमायुर्मानमेव मध्यमायुः । अस्य मानं द्वात्रिंशद्वर्षादधिकं चतुष्षष्टिवर्षपर्यन्तं[१४] भवति। केषाञ्चिन्मतेन सप्ततिवर्षपर्यन्तं मध्यायुः।[१५]

३. ४. दीर्घायुः-

दीर्घायुःप्रमाणं मध्यादधिकं भवति । वैदिकसंहितासु दीर्घायुषः प्रमाणं वर्षशतमिति मान्यता वर्तते। 'पश्येम शरदः शतम्', 'जीवेम शरदः शतम्', 'शृणुयाम शरदः शतम्', 'अदीनाः स्याम शरदः शतम्', 'जिजीविषेच्छतं समाः'[१६] इत्यादिवेदवचनेषु शतायुषः कामना विद्यते। इदं परमायुःप्रमाणात् किञ्चिन्न्यूनं भवति। तेन दीर्घायुषो मानस्यापि पञ्चधा विभज्य अध्यनं भवितुं शक्नोति। तद्यथा-

३. ४. १. सामान्यदीर्घायुः-

मध्यादुपरि सहस्रचन्द्रदर्शनपर्यन्तं चतुरशीतिवर्षाणि यावत्।

३. ४. २. मध्यमदीर्घायुः-

चतुरशीतिवर्षादुपरि द्विनवतिर्वर्षाणि यावत्।

३. ४. ३. उत्तमदीर्घायुः-

द्विनवतिवर्षादुपरि वर्षशतं यावत्।

३. ४. ४. अधिकदीर्घायुः-

वर्षशतादुपरि अष्टाधिकवर्षशतपर्यन्तम्।

३. ४. ५. अतिदीर्घायुः-

अधिकदीर्घायुर्मानादुपरि षोडशाधिकवर्षशतं यावत्।

---

१४ बृहत्पाराशरहोराशास्त्रम्, तत्रैव।

१५ जातकपारिजातः ४।३।

१६ शुक्लयजुर्वेदः ३६।२४, ४०।२।

३. ५. परमायुः–

सपञ्चनिशाविंशत्युत्तरवर्षशतमिति पूर्णायुः।[१७] अतिदीर्घायुर्मानादुपरि चान्द्रेण परमायुरेव जायते। अतस्तस्मात् स्वल्पेन न्यूनमपि मानं तत्तुल्यमेव।

३. ६. अमितायुः–

प्रामाण्यरहितायुः, परमायुमानादधिकायुः । महर्षिपराशरेणोक्तम्– वर्षसहस्रकं दिव्यं तदूर्ध्वममितमित्याहुः।[१८]

३. ७. आयुषोऽन्यभेदाः–

अनियतम्, नियतम्, योगोत्थितञ्चैते आयुषस्त्रयो भेदाः शास्त्रेष्वाचार्यैर्व्यवस्थापिताः सन्ति जीवनकालानुसारेणापि केनचित् सप्तधा केनचिन्नवधा च विभज्य आयुर्भेदा वर्णिताः सन्ति।

३. ८. गणितागतायुर्भेदाः–

अंशायुः, निसर्गायुः, पिण्डायुः, जीवशर्मोक्तायुः, मिश्रायुः, अष्टकवर्गजायुः, रश्मिजायुः, नक्षत्रजायुः, नवांशजायुः, केन्द्रजायुः, जैमिनीयायुः, बादरायणायुश्चेत्यादयो गणितसाध्या आयुर्भेदाः सन्ति।

४. जन्मकुण्डल्यां शतायुर्योगाः

'जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः' इति दुर्गासप्तशत्यां देवीकवचपाठस्य फलश्रुतिः। यस्य जन्मकुण्डल्यामपमृत्युरहितः सर्वारिष्टविवर्जितश्च शतायुष्ययोगो भवेत्तर्हि जातकः शतायुः स्यात् । अन्यथा अत्यन्तपुण्यकर्मफलादेव दीर्घायुष्यं सम्भवति । अत्र केषांचिद्दीर्घजीविनां जन्मकुण्डलीषु योगजपूर्णायुष्यलक्षणानामन्वेषणं विधीयते । तत्रादौ केचिद्दीर्घायुष्ययोगा विलिख्यन्ते—

४. १. जैमिनिमतेन दीर्घायुष्ययोगाः–

जैमिनिसम्प्रदायानुसारतो लग्नेशाष्टमेशाभ्यामायुर्विचारो विधीयते। जैमिनिसूत्रमितिग्रन्थे 'आयुः पितृदिनेशाभ्याम्' इति आयुर्दायसम्बन्धिप्रथमसूत्रम्। तथैव 'प्रथमयोरुत्तरयोर्वा दीर्घम्' इति द्वितीयसूत्रेण महर्षिजैमिनिना दीर्घायुष्यलक्षणमुक्तम्। जन्मकुण्डल्यां यदा लग्नेशाष्टमेशौ

---

१७ *समाः षष्टिर्द्विघ्नी मनुजकरिणां पञ्च च निशा........च परमम्॥* बृहज्जातकम्, आयुर्दायाध्यायः।

१८ *विंशाधिकः शतं दीर्घे दिव्ये वर्षसहस्रकम्।*
तदूर्ध्वममितं पुण्यैरमितैराप्यते जनैः॥ बृहपाराशरहोराशास्त्रम्, आयुर्दायाध्यायः।

द्वावेव चरराशिस्थितौ स्यातां तदा दीर्घायुष्यं भवति। एवं लग्नेशाष्टमेशयोर्मध्ये यदि एकः स्थिरराशिगतोऽन्यश्च द्विस्वभावराशिस्थितो भवेत्तदा दीर्घायुष्यं भवति। तथैव शनिचन्द्राभ्यां लग्नेशहोरालग्नेशाभ्याञ्चापि दीर्घायुष्यसाधनं करणीयम्। एतेषु योगत्रयेष्वपि दीर्घायुर्भवेत्तदा जातस्य दीर्घायुष्यमिति ज्ञेयम्।

४.२.पराशरमतेन दीर्घायुष्ययोगाः-

पराशरमुनिप्रणितबृहत्पाराशरहोराशास्त्रानुसारतो दीर्घायुष्यलक्षणमत्र विविच्यते-

४.२.१. यस्य जन्मपत्रिकायां सर्वे शुभग्रहाः (गुरु-शुक्र-बुध-चन्द्राः) केन्द्रस्थिताः स्युस्तथैव लग्नेशोऽपि शुभग्रहान्वितः सन् गुरुणा दृष्टो युक्तो वा भवेत्तस्य पूर्णायुष्यं भवति।

केन्द्रे शुभग्रहैर्युक्ते लग्नेशे च शुभान्विते।
दृष्टे युक्ते च गुरुणा पूर्णमायुस्तदा भवेत्॥

४. २. २. गुरुशुक्रयोः सम्बन्धेन केन्द्रस्थितो लग्नेशः पूर्णायुष्यं करोति।

केन्द्रस्थिते विलग्नेशे गुरुशुक्रसमन्विते।
ताभ्यां निरीक्षिते वाऽपि पूर्णमायुर्विनिर्दिशेत्॥

४. २. ३. लग्ने कर्कटराशिस्थितौ चन्द्रेज्यौ, केन्द्रे बुधशुक्रौ स्थितौ भूत्वा त्रिषडायस्थाने सर्वे पापग्रहास्तिष्ठन्ति तदा जातकोऽमितायुर्भवेत्।

चन्द्रेज्यौ तु कुलीराङ्गे ज्ञसितौ केन्द्रसंस्थितौ।
अन्ये त्र्यायारिगाः खेटा अमितायुस्तदा भवेत्॥

४. २. ४. यस्य जन्मकुण्डल्यां सर्वे शुभग्रहाः केन्द्रे त्रिकोणे वा स्युस्तथा सर्वे पापाः तृतीयषष्ठैकादशगाः भवन्ति, अष्टमभावः शुभग्रहस्य गृहं चेत्तदा दीर्घायुष्यं भवति।

सौम्याः केन्द्रत्रिकोणस्थाः पापास्त्र्यायारिगास्तथा।
शुभराशौ स्थिते रन्ध्रे दिव्यमायुस्तदा भवेत्॥

४. २. ५. यदि कुण्डल्यां लग्नं कर्कटः, गुरुः केन्द्रे गोपुरांशस्थितोऽर्थाद् दशवर्गाणां मध्ये चतुर्वर्गेषु स्वोच्चादिस्थितो भूत्वा बलवान् भवति चेत्ततः शुक्रोऽपि पारावतांशकेऽर्थाद् दशवर्गाणां मध्ये षड्वर्गेषु स्वोच्चादिस्थितो भवेत्तदा युगान्तायुर्भवति।

गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके।
त्रिकोणकर्कटे लग्ने युगान्तायुस्तदा भवेत्॥

४. २. ६. तथैव कुण्डल्यां बलवन्तौ शनिभौमौ क्रमेण देवलोक-पारावतांशयोः स्याताम्, लग्नस्थितो गुरुश्च सिंहासनांशगो भवेत्तदा मुनिसमानदीर्घायुर्भवति।

देवलोकांशगे मन्दे कुजे पारावतांशके।
गुरौ सिंहासनांशेऽगे जातो मुनिसमो भवेत्॥

अत्र देवलोकादीनां लक्षणस्य[१९] दशवर्गेष्वन्वेषणं करणीयम्।

४. ३. वराहमतेन दीर्घायुष्ययोगाः-

वराहमिहिरेण स्वकीयबृहज्जातकग्रन्थे मययवनमणित्थादीनां मतैरायुर्दायानां गणितविधीन् प्रदर्श्य पश्चाद् ग्रहयोगावपि प्रदर्शितौ। तद्यथा-

४. ३. १. अनिमिषपरमांशे विलग्ने शशितनये गवि पञ्चवर्गलिप्ते।
भवति हि परमायुषः प्रमाणं यदि सकलाः सहिताः स्वतुङ्गभेषु॥

अत्र परमायुषः कृते वर्गोत्तमनवांशयुक्तं मीनलग्नमपेक्षितम्। तत्रापि बुधः पञ्चविंशतिलिप्तकान् भुक्त्वा वृषे स्थितोऽन्ये सकला ग्रहाः स्वस्वतुङ्गभेषु स्थिता भवन्ति तदा जातस्य परमायुर्भवति।

४. ३. २. गुरुशशिसहिते कुलीरलग्ने शशितनये भृगुजे च केन्द्रयाते।
भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद् विना स्यात्॥

मतमिदं वराहेण पराशरस्यैवाङ्गीकृतम्।

४. ४. वैद्यनाथमतेन दीर्घायुष्ययोगाः-

वैद्यनाथस्य स्थितिकालः १३५० मितशकाब्दमिति मन्यते। आचार्योऽसौ नैवातिप्राचीनः। अतस्तेनायुष्यविषयेऽपि निजपूर्वाचार्याणां मतानि निजग्रन्थे समावेशितान्येव। वैद्यनाथेन स्वकीयजातकपारिजातग्रन्थे बहवो दीर्घायुष्ययोगाः सङ्कलिताः सन्ति। तेषु मध्ये ये शतायुःसंज्ञकास्तएवात्र विलिख्यन्ते।[२०]

---

१९ *उत्तमं तु त्रिवर्गैक्यं चातुर्वर्गन्तु गोपुरम्।*
वर्गपञ्चकसंयोगं सिंहासनमिहोच्यते॥
वर्गद्वयं पारिजातं षण्णां पारावतांशकः।
सप्तमं देवलोकं स्यादष्टमं च तथा भवेत्॥ जातकपारिजातः १।४५-४६।

२० जातकपारिजातः, अरिष्टाध्यायः श्लो. ८५-१०४।

४. ४. १. यस्य जन्मकुण्डल्यां लग्नेशो बलवान् भूत्वा शुभग्रहैर्वीक्षितः सन् केन्द्रे त्रिकोणे वा वसेत्तदा नरो दीर्घायुर्भवति। यस्य केन्द्रे शुभग्रहाः कारकाश्चैव तिष्ठन्ति, अष्टमेशो शुभग्रहैर्वीक्षितो भवेत्तदापि दीर्घायुर्भवितुमर्हति।

४. ४. २. यदि शुभग्रहाः केन्द्रस्थिताः स्युस्तथैव शुभग्रहाणामन्यतमेन युतो लग्नेशो गुरुणा दृष्टश्चेत्तदा पूर्णायुर्भवति। मतमिदं पूर्वोक्तं पराशरतुल्यम्।

४. ४. ३. केन्द्रस्थिते विलग्नेशे गुरुशुक्रयोरन्यतमेनान्वितेऽथवावलोकिते पूर्णायुर्भवतीति पूर्वोक्तं पराशरतुल्यमेव।

४. ४. ४. स्वकीयोच्चान्वितास्त्रयो ग्रहाः लग्नेशाष्टमेशाभ्यां सह सम्बन्धयुताः स्युस्तथैवाष्टमस्थानमशुभैर्विहीनं चेत्तदा दीर्घमायुर्भवति।

४. ४. ५. लग्नेशः सबलो भूत्वा यद्यष्टमे त्रयो ग्रहाः स्वोच्चमित्रस्ववर्गादिस्थानस्थिताः सबलाः स्युस्तदा दीर्घमायुर्भवति।

४. ४. ६. शन्यष्टमेशयोर्मध्येद्रन्यतरेणान्वितः स्वोच्चस्थितो ग्रहोऽपि दीर्घायुष्यप्रदो भवति।

४. ४. ७. यदि जन्मकुण्डल्यां लग्नेशो बलवान् भूत्वा त्रिषडैकादशस्थिताः पापाः केन्द्रत्रिकोणस्थिताश्च शुभाः स्युस्तदा पूर्णमायुर्भवति।

४. ४. ८. यदि षट्सप्ताष्टमभावेषु शुभग्रहास्तथा त्रिषडायेषु पापा निवसन्ति तदा दीर्घमायुर्भवति।

४. ४. ९. पापग्रहाः षड्द्वादशभावयोः स्थित्वा लग्नेशो यदि केन्द्रे सबलो भवेत्तदा दीर्घायुष्यं भवति।

४. ४. १०. कर्मेशः स्वोच्चराशिगतो भूत्वा पापग्रहाश्चाष्टमस्थिताः स्युस्तदापि दीर्घायुष्यं भवति।

४. ४. ११. अष्टमेशो व्यवस्थितभावस्याधिपतिः यस्मिन् राशौ स्थितो भवेत्तस्याधिपतिः सबलो भूत्वा केन्द्रे स्यात्तथैव लग्नेशोऽपि केन्द्रस्थितो भवेत्तदा जातस्य दीर्घायुष्यं भवति।

४. ४. १२. यदा मिथुनकन्याधनुर्मीनामन्यतमं लग्नं भवेत्, लग्नेशः केन्द्रस्थितोऽथवा स्वोच्चमूलत्रिकोणराशौ सबलो भवेत्तदा जातस्य दीर्घायुष्यं भवति।

४. ४. १३. यदा द्विस्वभावं लग्नं भवेत्, लग्नेशात् केन्द्रगौ द्वौ पापौ च भवेतां तदा जातो दीर्घायुर्भवति॥

४. ४. १४. यदि नवांशकुण्डल्यां चरराशिस्थिताः सूर्यभौमशनयः स्थिरराशिस्थितौ गुरुशुक्रौ शेषाश्चन्द्रबुधराहुकेतवो द्विस्वभावराशिस्थिताः स्युस्तदा जातः शतायुर्भवति।

४. ४. १५. यदि रविजीवभौमाः शन्यंशकेऽथवा नवमभावे यस्मिन् कस्मिन्नपि राशौ वर्गोत्तमाः स्युस्तथा सबलश्चन्द्रोऽपि लग्नस्थितो भवेत्तदा जातस्य युगान्तमायुर्भवति।

४. ४. १६. तुल्यनवांशगतौ गुरुशनी शुभग्रहाणां दृष्टियुतौ च भूत्वैकत्र धर्मेऽथवा कर्मभवने स्यातां तथा लग्ने च बलवान् सूर्यो भवेत्तदा जातश्चिरायुर्भवति।

४. ४. १७. यदि कर्कटलग्ने गुरुचन्द्रौ ततोऽपि बुधशुक्रौ केन्द्रे शेषाश्च त्रिषडायस्थानेष्वन्विताः स्युस्तदा जातस्यामितायुरिति पराशरस्यैव वचनमत्रापि गृहीतम्।

४. ४. १८. यदि पापगग्रहास्त्रिकोणे न भवेयुः, सौम्याः केन्द्रे न स्युस्तथैवाष्टमेऽपि पापग्रहाणां योगो न भवेत्तदा जातस्यायुर्देवतुल्यमर्थाद्दीर्घं भवति।

४. ४. १९. लग्नादिभावे शनिमारभ्य भौमावधिका ग्रहा भवेयुस्तथा त एव वैशेषिकांशसंयुक्ताः स्युस्तदा जातस्य देवतातुल्यं दीर्घायुष्यं भवति।

४. ४. २०. मेषस्य परमांशे लग्नं भूत्वा तत्रैव गुरुः शुक्रो वा तिष्ठेत्तथैव वृषराशावपि पञ्चमे नवांशे चन्द्रमास्तिष्ठत्येवञ्चात्र मङ्गलोऽपि सिंहासनांशे स्थितो भवेत्तदा योगेऽस्मिन् जातो नरो मन्त्रसाधको भवत्यतस्तस्यायुरपि वर्धते । तस्य मन्त्रादीनां जपादिबलेन योगादिसाधनाच्चातिदीर्घजीवनं भवति।

४. ४. २१. यस्य जन्मकुण्डल्यां शनिर्देवलोकांशकेद्रर्थात् स्वसप्तवर्गे तथा भौमः पारावतांशके (स्वकीयषड्वर्गे) स्थित्वा गुरुश्चापि लग्ने सिंहासनांशगो भवेत्तस्य जीवनमपि मुनितुल्यममितायुष्यं च भवति।

४. ४. २२. जन्मसमये कर्कटलग्नं भूत्वा यदि गुरुः केन्द्रे गोपुरांशे शुक्रश्च त्रिकोणे पारावतांशे स्थित्वा तिष्ठेतां तदा जातस्य युगान्तायुर्भवति।

४. ४. २३. मृत्युभावफलकथनप्रसङ्गेऽपि दीर्घायुर्विषये वैद्यनाथेन पश्चाद् विहितमेकं श्लोकम्।[२१]

स्वस्थे रन्ध्रपतौ चिरायुरुदयच्छिद्राधिपौ षष्ठगौ
रिष्फस्थौ यदि वा समेति मनुजो जातश्चिरायुर्बलम्।
व्यापारोदयरन्ध्रराशिपतयः केन्द्रत्रिकोणायगा
दीर्घायुर्विबलाः सभानुतनया यद्यल्पमायुर्वदेत्॥

२१ जातकपारिजातः, सप्तमाष्टमनवमभावफलाध्यायः श्लो. ४९।

श्लोकेऽस्मिन् त्रयो योगाः सन्ति। स्वराशिस्थितेऽष्टमेशे दीर्घायुरिति प्रथमः। लग्नेशाष्टमेशौ षष्ठगौ वा द्वादशगौ वा स्याताम् तदा मनुजो दीर्घायुर्भवेदिति द्वितीयः। दशमेशलग्नेशाष्टमेशाः यथासम्भवं केन्द्रेषु, त्रिकोणेषु तथैकादशभवने स्युस्तदापि दीर्घायुरिति तृतीयः। परञ्चैते विबलाः शनियुताश्च नैव पूर्णफलदायकाः स्युरित्यस्य भावः।

४. ५. एवमेव विभिन्नजातकशास्त्रेष्वनेकाचार्यकृता नैकविधा योगा द्रष्टुं शक्यन्ते। लग्नवशाल्लग्नेशवशादष्टमेशवशात्तथा केन्द्रस्थितशुभग्रहवशादष्टमस्थितग्रहवशाच्चापि दीर्घायुष्यं भवितुमर्हति।

४. ६. **मारकादिविचारः-** 'कलौ पाराशरी स्मृतिः' इति वचनात् कलियुगे पाराशरीय-दशापद्धत्यनुशीलनं विधीयते। तत्र पराशरमुनिना मारकदशाया विश्लेषणं कृतम्।

अष्टमं ह्यायुषःस्थानमष्टमादष्टमं च यत्।
तयोरपि व्ययस्थानमारकस्थानमुच्यते॥[२२]

यस्य जन्मकुण्डल्यां मारकग्रहा लग्नेशात् प्रबला भवेयुस्तदा दीर्घजीवने बाधका भवितुमर्हन्ति। प्रबलमारकैः सहारिष्टप्रदग्रहाणां परस्परसम्बन्धादायुःक्षयो भवतीति तज्ज्ञा वदन्ति। परन्त्वरिष्टभङ्गदाः प्रबला ग्रहाः प्राणरक्षां कुर्वन्तीति शास्त्रविमर्शः। उक्तञ्च- 'सुयोगैर्वर्धते ह्यायुः कुयोगैर्हीयते तथा' इति। यदि शुभयोगैरायुष्यमवशिष्यते तदा मारकोऽपि क्लेशावह एव स्यान्न तु प्राणापहारकः। अष्टमं ह्यायुषः स्थानमतस्तत्रापि शुभयोगैरष्टमेशस्य प्राबल्येनापि दीर्घायुष्यं भवितुमर्हति।

५. शतायुषां केषांचिज्जन्मकुण्डलीविश्लेषणम्

५. १. युगपुरुषः राष्ट्रकविः माधवप्रसादघिमिरेः-

नेपालदेशे सुविख्यातस्य राष्ट्रकवीतिभूषणमण्डितस्य माधवप्रसादघिमिरेमहोदयस्य जन्म १९७६ तमे वैक्रमाब्दे आश्विनमासस्य ७ दिनगते तथा चान्द्रेण आश्विनमासे कृष्णपक्षे चतुर्दश्युपरि अमायां तिथौ पूर्वफाल्गुनीनक्षत्रोपर्युत्तरफाल्गुनीनक्षत्रे लमजुङमण्डलस्य पुस्तुनग्रामे सन्ध्यायां सप्तमवादनसन्निकृष्टे समयेऽभवत्।[२३] तत्रभवता कविवरेण सैकवर्षशतं यावत् काव्यधाराः प्रवाह्य नेपालीवाङ्मयसंस्कृतिपरम्परादेः श्रीवृद्ध्यर्थम्

२२ लघुपाराशरी ३।१।

२३ राष्ट्रकविघिमिरेमहाभागस्य निकटजनाज्जन्मविवरणं प्राप्तम्।

महनीयावदानं कृतम्। नेपालराष्ट्रे पूजितोऽयं महाभागः २०७७ तमे वैक्रमाब्दे भाद्रमासस्य द्वितीयदिवसे दिवंगतः।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो राष्ट्रकवेः जन्मकुण्डल्यां वर्गोत्तमनवांशयुक्तं मीनलग्नमस्ति। 'अनिमिषपरमांशे विलग्ने' (बृ.जा. ७।६) इत्युक्त्वाद् वराहमतानुसारेणात्र दीर्घायुष्यलक्षणं प्राप्यते। पुनश्च स्वकीयनवांशे स्वकीयोच्चराशिस्थितः सन् लग्नपतिर्गुरुः लग्नभावे पूर्णदृष्ट्या पश्यति। मीनलग्नं द्विस्वभावं राशिश्चेत्यत्रापि दीर्घायुष्यलक्षणम्। तथा च वैद्यनाथः–

द्विस्वभावं गते लग्ने तदीशे केन्द्रगेऽपि वा।
स्वोच्चमूलत्रिकोणे वा चिरं जीवति भाग्यवान्॥ (जातकपारिजातः ४।९४)

नैव केवलं तावच्छतायुष्यमपि चानेन महाभागेन महती कीर्तिरपि प्राप्ता। कीर्तियुता एव स्वकृतिषु युगान्तं यावज्जीवन्ति। अत एवास्य कर्मयोगैरप्यायुष्यान्वेषणं करणीयम्। अस्य जन्मलग्नतः केन्द्रे उच्चराशिस्थितत्वाद् बुधेन भद्रमहापुरुषयोगो जायते।[२४] पञ्चमे विद्याभावे स्वोच्चस्थस्य गुरोर्योगः प्रशस्यतेऽनेकैः पूर्वाचार्यैः। स एव कर्मेशो लग्नेशश्च गुरुस्त्रिकोणपतिना कुजेन सहान्यत्रिकोणस्थाने योगं करोति तदा किं परमिति पाराशरीयमतवैशिष्ट्यं[२५] तत्रभवतो जीवने प्रत्यक्षमेव दृश्यते। योगैरेतैर्ब्रह्मतेजसा दीप्तोऽयं कविवरः सहस्रमितान् काव्यानसृजत्।

अनेन महापुरुषेण काव्यधारासु पदे पदे नेपालदेशस्य वन्दना विहिता। अयं हि काव्यध्वजामुत्थाप्य सहसा सगरशिरसि स्थापितवान्। काव्यगण्डक्या जलधारासु शालग्रामाः

२४ताराग्रहैर्बलयुतैः स्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः। पञ्चपुरुषाः प्रशस्ता जायन्ते तानहं वक्ष्ये। जीवेन भवति हंसः सौरेण शशः कुजेन रुचकश्च। भद्रो बुधेन बलिना मालव्यो दैत्यपूज्येन। बृहत्संहिता ६८।१-२।

२५ लघुपाराशरी, योगाध्यायः।

शिल्पिताः। अस्य जिह्वायां वाग्देवी नृत्यति स्म। अस्य काव्यधारायां भारती निमज्जति स्म। अत एव 'लक्ष्मीस्थानं त्रिकोणं स्याद् विष्णुस्थानं तु केन्द्रकम्। तेषां संयोगमात्रेण चक्रवर्ती नरो भवेत्॥'[२६] इति महर्षिपराशरोक्तयोगेन नेपालीकाव्यजगत्यद्वितीयलोकनायकत्वेनान्यत्रापि यशसा तत्रभवतो नाम स्वर्णाक्षरेषु नितरां सहस्रवर्षपर्यन्तमपि नक्षत्रवद्देदीप्यमानं भवेत्।

५. २. अष्टोत्तरशतवर्षीयः केशवराजज्ञवाली–

लुम्बिनीप्रदेशान्तर्गतस्य नवलपरासीमण्डलस्य सुनवल–नगरपालिकायां हरकट्टास्थाने निवसतः श्रीमत्केशवराजज्ञवालीमहाभागस्य जन्म १९७० तमे वैक्रमाब्दे श्रावणमासस्य १६ दिनगते श्रावणकृष्णपक्षे त्रयोदश्युपरिचतुर्दश्यां तिथौ आर्द्रापरिपुनर्वसुनक्षत्रे बृहस्पतिवासरे रात्रिर्गतघट्यादिषु ८।५३ मीनलग्नोदये वर्गोत्तमनवमांशे गुल्मीमण्डलस्य बलेटक्सारग्रामेऽभवत्।[२७] महाभागोऽयं वयसा १०८ तमे वर्षे २०७८ मित वैक्रमाब्दे वैशाखमासस्य ३० गतदिवसे दिवंगतः।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो ज्ञवालीमहाभागस्य जन्मकुण्डल्यां पराशरमतानुसारेण दीर्घायुष्यलक्षणं प्राप्यते। अत्र शुभग्रहाः (गुरु–शुक्र–चन्द्राः) केन्द्रस्थिताः। दशमभावे स्वराशिस्थितः सन् लग्नपतिर्गुरुः सुखस्थाने पूर्णदृष्ट्या पश्यति, यत्र शुभग्रहौ चन्द्रशुक्रावस्थितौ स्तः। लग्नेशो गुरुरतिबलशाली शुभग्रहाभ्यां दृष्टिसम्बन्धेनान्वितोऽप्यस्ति। योगोऽयं पूर्णायुष्यकारकः (बृ.पा. ३९।७१)। अस्यां जन्मकुण्डल्यां नैकविधयोगलक्षणान्यपि शास्त्रानुमोदितानि सन्ति। तेष्वपि हंसाख्यमहापुरुषयोगोऽत्र प्रधानः।[२८]

---

२६ मध्यपाराशरी, प्रथमपरिच्छेदः श्लो. १६।

२७ केशवराजज्ञवालीमहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते।

२८ बृहत्संहिता ६८।१-२।

ज्ञवालीमहाभागेन वैदिकसनातनधर्मसंस्कृतिपरम्परादेः संरक्षणाय यौवने वयस्येव स्वजन्मभूमितः भारतस्य देहरादूनक्षेत्रे गत्वा नेपालीसमाजस्य गौरववर्धनाय महनीयावदानं कृतम् । ततस्तेन पुनरागत्य स्वकीयसमाजेऽपि धार्मिकसामाजिककर्मणा प्रतिष्ठा प्राप्तेति स्मर्यते जनैः । मान्यवरो विख्यातकीर्तिः सुखभाक् च जातः । परञ्चायुष्यं विहायान्ये न तावद् विख्यातराजयोगादयश्च तत्रभवतो जीवने समागताः इत्यपि वदन्ति केचिद् वार्ताकाराः ।

२०३५ मित वैक्रमाब्दे अस्य पत्नी स्वल्पे वयसि दिवंगता । परन्तु ब्रह्मतेजसा दीप्तोऽयं महाभागः साग्राष्टशततमे वयसि शीतकालेऽपि शीतजलेनैव प्रतिदिनं स्नानं विधाय सन्ध्यावन्दनं स्वेष्टदेवताराधनञ्च सततं करोति स्म । एतावद् वयस्यप्यास्य महाभागस्य न मनसि स्मृतिलोपो दृष्टो न च शरीरे तावद्दैन्यमिति तत्रत्या जनाः स्मरन्ति ।

अन्तिमे वयस्यस्यैकोऽवसरोऽपूर्वः सञ्जातः । अस्य ज्येष्ठात्मजेन दधिरामज्ञवालीमहोदयेन वयसा सहस्रचन्द्रदर्शनं कृतम् । तस्यैव पूरणावसरे (२०७७ वैक्रमाब्दस्य कार्तिकमासे) परिवारजनैः स्वगृहे चतुरशीतिपूजा आयोजिता । अनेन पूजावकाशे तस्मै ज्येष्ठपुत्रायाशीर्वचनं दत्तम् । सन्निकृष्टा बहवो जनास्तत्रभवतो दर्शने समागताः । तेन सर्वेभ्यः समागतेभ्यश्चापि दध्यक्षततिलकादिभिरलंकृत्याशीर्वचनं दत्तम् । देवतुल्यपुरुषस्य दर्शनेन तस्याशीर्वादान् च लब्ध्वा सर्वेऽपि तुष्टाः नतमस्तकाः सञ्जाताः । वार्तेयं नेपालटेलिभिजने, विविधासु पत्रिकासु तथाऽन्यसमाचारसञ्जालकेष्वपि च प्रकाशिता आसीत् ।[२९]

५.३. सप्तोत्तरशतायुः भूमीश्वरसापकोटा–

इह संसारे कोटिष्वपि केचन भाग्यवन्तो जना एवाव्याधिना शरीरेण वर्षशतोपरि जीवन्ति । तेषु मध्ये एकोऽस्ति भूमीश्वरसापकोटामहाभागः । अनेन महापुरुषेण धवलागिर्यञ्चलान्तर्गतबागलुङमण्डलस्य दमेकग्रामस्थाने १९७१ तमे वैक्रमाब्दे माघमासस्य प्रथमदिवसे बृहस्पतिवासरे १७:५० वादनसमये चान्द्रेण माघकृष्णपक्षे चतुर्दश्यां तिथौ पूर्वाषाढानक्षत्रे जन्म प्राप्तम् ।[३०] महाभागोऽयं २०७७ तमे वैक्रमाब्दे कार्तिकमासस्य २८ गतदिवसे दिवंगतः ।

तत्रभवतो सापकोटामहाभागस्य जन्मकुण्डल्यां लग्नाष्टमेशौ विचारणीयौ । स्वस्थे रन्ध्रपतावित्यादिवैद्यनाथकृतपूर्वोक्तश्लोकस्य द्वितीयनियमोऽत्र दीर्घायुष्यदायको दृश्यते । लग्नेशाष्टमेशौ षष्ठगौ वा द्वादशगौ वा स्याताम् तदा मनुजो दीर्घायुर्भवेदिति तस्य भावो

२९ बाबुले गराइदिए छोराको चौरासी पूजा, अनलाइन खबर डट कम, २०७७ कार्तिक १४ गते १५:२७ प्रवादनसमये प्रकाशितमिति ।

३० भूमीश्वरसापकोटामहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते ।

वर्तते । चन्द्रशनैश्चरावत्र दृष्टिसम्बन्धयुतौ लग्नाष्टमेशौ क्रमेण षष्ठद्वादशस्थानस्थितौ । अनयोरेकत्रैवावस्थितिर्नास्ति परञ्च स्थानद्वयेऽपि कारकभावे स्थितत्वाद्योगफलं भवत्येव । योगेऽस्मिन् योगकारकत्वात् शनिरपि नैव भङ्गदः ।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो जन्मकुण्डल्यां सन्ति केचिदरिष्टयोगाः शास्त्रसम्मताः –

षष्ठाष्टरिष्फगश्चन्द्रः क्रूरैः खेटैश्च वीक्षितः ।
जातस्य मृत्युदः सद्यस्त्वष्टवर्षैः शुभेक्षितः ॥[31]

अत्र षष्ठभावे कुजेन युक्तः शनिना दृष्टश्चन्द्रः सद्योऽरिष्टकारको भवेदिति पराशरोक्तिः । अस्याष्टमस्थितो राहुश्चाप्यरिष्टदायको भवेदिति मन्त्रेश्वरवचनम्– 'रन्ध्रेऽल्पायुरशुद्धिकृच्च विकलो वातामयोऽल्पात्मजः' ।[32] तथैव भृगुसूत्रेऽपि– 'अतिरोगी । द्वात्रिंशद्वर्षायुष्मान् । शुभयुते पञ्चचत्वारिंशद्वर्षाणि । भावाधिपे बलयुते स्वोच्चे षष्टिवर्षाणि जीवितम् ।'[33]

अत्र सामान्यवाक्येषु दीर्घायुष्यकारणं न प्राबल्येन दृश्यते । तेनानुसन्धेयोऽयं विषयः । सन्दर्भेऽस्मिन् आचार्यमहेशेनाष्टमस्थितो राहुः किञ्चित्कष्टदायक इत्येवोक्तम् ।[34]

अत्र राहुः स्वमूलत्रिकोणस्थितः सन् धर्मनाथेन गुरुणा युतोऽप्यस्ति । 'यद्यद् भावगतौ वाऽपि यद्यद् भावेशसंयुतौ । तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ'[35] इत्युक्तेनापि गुरुणा

---

३१ बृहत्पाराशरहोराशास्त्रम् १०।०२ ।

३२ चमत्कारचिन्तामणिः, टीकाकारः मालवीयदैवज्ञधर्मेश्वरः, सम्पादकः ब्रजबिहारीलालशर्मा, पृ. ४९९ ।

३३ चमत्कारचिन्तामणिः, पूर्ववत् , पृ. ५०० ।

३४ *अनिष्टनाशं खलु गुह्यपीडां प्रमेहरोगं वृषणस्य वृद्धिम् ।*
प्राप्नोति जन्तुः विकलारिलाभं सिंहीसुते वा खलु मृत्युगेहे ॥ चमत्कारचिन्तामणिः, पूर्ववत् , पृ. ४९८ ।

३५ लघुपाराशरी १।१३ ।

युतेनास्य शुभफलकर्तृत्वमेव गुणगौरवं स्यात्तेनास्यातिबलयुतेन तत्रभवतोऽल्पायुष्यं न भवेदिति वक्तुं शक्यते।

अष्टमस्थितस्य गुरोर्विषयेऽपि मिश्रितवाक्यान्युपलभ्यन्ते। तथा च भट्टनारायणः-

'चिरं नो वसेत् पैतृके चैव गेहे चिरस्थायिनो तद्गृहं तस्य देहम्।
चिरं नो भवेत् तस्य नीरोगमङ्गं गुरुर्मृत्यगो तस्य वैकुण्ठगन्ता ॥'[३६]

सन्दर्भेऽस्मिन् बहुशो दीर्घायुष्यं वदन्ति विद्वांसः। 'परिभूतो दीर्घायुर्भृतको दासोऽथवा निधनसंस्थे' इति कथितं कल्याणवर्मणा। 'चिरञ्जीवी किन्तु प्रभवति गदार्तो हि मनुजः' इत्युक्तं जीवनाथेन। 'मेधावी नीचकर्मा यदि द्विजगुरौ रन्ध्रयाते चिरायुः' इति वैद्यनाथमतम्। मन्त्रेश्वरेणापि 'दीर्घायुरिज्येऽष्टमे' इति कथितं वर्तते।[३७] तत्रभवतो जीवनेऽपि पक्षोऽयं समीचीनः।

सापकोटामहाभागेन वैदिकसनातनधर्मसंस्कृतिपरम्परानुशीलने तेषां संरक्षणे संवर्धने च मार्गदर्शनं विहितमस्ति। अस्य बाल्ये वयसि ग्रामे शिक्षाध्ययनस्य समुचिता व्यवस्था नैवासीत्। अनेन तस्मिन् समयेऽवसरे प्राप्तेऽप्यध्ययने आलस्यं कृतमासीत्तेन पश्चिमे वयसि परितप्यते स्म।

वयस उत्तरकाले जन्मस्थानं परित्यज्य त्रिवेणीक्षेत्रे नवलपरासीमण्डलस्य गैंडाकोटस्थाने निजपरिवारैः सह २०२९ तमे वैक्रमाब्दे समागतः। तत्रैवानेन षोडशबिघापरिमितां सस्यश्यामलां भूमिं क्रीत्वा गृहक्षेत्रादिकं व्यवस्थापितम्। इह पुण्यभूमौ समागत्य तत्रभवता धार्मिकसामाजिकराजनीतिकशैक्षिककक्षेत्रेषु च बहूनि कार्याणि कृतानि। गैंडाकोटे नेपालसंस्कृतविश्वविद्यालयान्तर्गतकालिकाविद्यापीठस्य स्थापने भूमिं दत्त्वा चिरकालं यावत् स्मरणीयावदानमपि कृतम्।

वानप्रस्थसमये तत्रभवान् श्रीवैष्णवीं दीक्षां गृहीतवान्। ततश्च महतां परोपकारे तपश्चर्यायां चास्य प्रवृत्तिः सञ्जाता। तत्रभवता सङ्कल्पैनैव तावद्दीर्घायुष्यं जीवनं प्रापितमित्यपि विश्वस्यते जनैः। जन्मकुण्डल्यामपि 'सुतस्थाने शुक्रे गतवति यदा जन्मसमये, ...जपात् सिद्धिः सर्वा प्रभवति जनानामपि मनो'रिति जीवनाथवचनात् शुक्रस्तपश्चर्यादिषु कारको दृश्यते।[३८] 'जीवे मृत्युगते ज्ञानात् सुतीर्थे मरणं भवेत्' इति गर्गवचनमपि त्रिवेणीक्षेत्रे मरणात् समीचीनमेव।

३६ चमत्कारचिन्तामणिः, पूर्ववत् , पृ. २९८।

३७ चमत्कारचिन्तामणिः, पूर्ववत् , पृ. २९९-३००।

३८ चमत्कारचिन्तामणिः, पूर्ववत् , पृ. ३४८।

५.४. चतुरुत्तरशतवर्षीयः टङ्कनाथ-भुर्तेलः-

इलाममण्डलस्य बरबोटेनामकस्थाने निवसतः टङ्कनाथ-भुर्तेलमहोदयस्य जन्म १९७४ तमे वैक्रमाब्दे कार्तिकमासस्य २४ दिनगते शुक्रवासरे कार्तिककृष्णपक्षे दशम्युपर्यैकादश्यां तिथौ रात्रेर्गतघट्यादिषु २५।१० कन्या लग्ने वृषनवांशके तत्रैव निजगृहेऽभूत् ।[३९] सम्प्रति महाभागोऽयं १०४ तमे वर्षे प्रविष्टोऽस्ति ।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो भुर्तेलमहाभागस्य जन्मकुण्डल्यां लग्नेशो बुधस्तृतीयस्थाने स्थिरराशौ स्थानाधिपेन कुजेन शुभग्रहेण गुरुणा च दृष्टः सन् सबलोऽस्ति । केन्द्रे शुक्रो विद्यते । तेनास्य महाभागस्य जन्मकुण्डल्यामन्योऽन्याश्रयसंस्थितौ गुरुशुक्रौ तथा च सम्बन्धयुतौ गुरुबुधौ दीर्घायुष्यकारकौ दृश्येते । यद्यपि द्वादशभावे चन्द्रो निर्बलस्तथाप्यस्य स्थिरराशिस्थितत्वान्न मनस्यस्थिरस्वभावो दृश्यते । लग्नेशस्य गुरुणा सह सम्बन्धाद् ब्रह्मतेजसा दीप्तोऽयं चिन्तारहितो धैर्यवान् पुरुष एव । 'केन्द्रे शुभग्रहै' रित्यादिकं पराशरमतमत्रापि पूर्णायुष्यकारणम् ।

भुर्तेलकुलभूषणोऽयमेतावद्वयस्यपि निजकार्येषु समर्थोऽस्ति । महाभागेनानेन बाल्ये वयसि स्वग्रामे स्थित्वैव वैदिकधार्मिकग्रन्थानां किञ्चिदध्ययनं विहितम् । स वैदिकसनातनधर्मसंस्कृतिपरम्परानुशीलने तेषां संरक्षणे संवर्धने च सम्प्रति सततं मार्गदर्शनं करोति । महाभागोऽयमद्यतनकालेऽपि प्रतिदिनं स्नानं कृत्वा सन्ध्यावन्दनस्वेष्टदेवपूजनादिकञ्च विधाय घण्टाद्वयं यावद् वेदपाठं करोति । ततश्चापि गोष्ठे गत्वा गोभ्यो ग्रासं दत्त्वैव भोजनं करोति । कदाचिद् ग्रामे भ्रमणञ्च करोति । अस्यैतावद्वयस्यपि न शरीरे तावद्दैन्यं दृश्यते न च मनसि स्मृतिलोपः । अनेन स्वकीयसमाजे धार्मिकसामाजिककर्मणा प्रतिष्ठा प्रापितमिति तत्रत्या जनाः प्रशंसन्ति ।

---

३९ टङ्कनाथभुर्तेलमहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते ।

५. ५. शताधिकायुष्मान् त्रिलोचनभट्टराई–

मरणन्तु देहिनां धर्म एव। परन्तु जन्मनारभ्य ये मरणपर्यन्तं वर्षशताधिकं यावच्छरीरेण मनसा च क्लेशं विना सुखेन जीवन्ति तेषां जीवनं पूर्णं धन्यञ्च भवति । तेषु मध्ये एकोऽस्ति त्रिलोचनभट्टराईमहाभागः । अनेन महाभागेन इलाममण्डलान्तर्गतसोयाङग्रामस्य शिरीषेनामस्थाने १९७१ तमे वैक्रमाब्दे चैत्रमासस्य २० दिनगते शुक्रवासरे वैशाखकृष्णपक्षे द्वितीयोपरि तृतीयायां तिथौ श्रीसूर्योदयाद्गतघट्यादिषु ३७।२८ तुला लग्ने वृषनवांशके जनिं लब्ध्वा २०७४ तमे वैक्रमाब्दे आषाढमासस्य १४ दिनगते प्रभातवेलायां वयसा १०३ तमे वर्षे मरणं प्राप्तम्।[४०]

भट्टराईमहाभागेन स्वग्रामे धार्मिकसामाजिकशैक्षिकक्षेत्रेषु नितरां सेवा विहिता । पौरोहित्यकर्मणा धार्मिकमर्यादायाः संरक्षणे तदनुसरणे प्रचारे प्रसारे च प्रशस्यं योगदानं विहितमिति तत्रत्या जनाः स्मरन्ति। तत्रभवता भूमिं दत्वा स्वग्रामे द्वौ विद्यालयौ स्थापितौ। ग्रामकृषकत्वेन जीवनं निर्वहन् तत्रभवता प्रदत्तेनावदानेन लाभान्वितास्तत्रत्या जनाः सम्प्रति मुक्तकण्ठेन तत्रभवन्तं प्रशंसन्ति।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो भट्टराईमहाभागस्य जन्मकुण्डल्यां पञ्चमभावे पञ्चग्रहाणां योगोऽस्ति । तेषां मध्ये शुभग्रहौ बुधगुरू, शुक्रो लग्नेशः शुभाख्यश्च । तत्र स्थितौ कुजराहू पापाख्यौ परञ्चाधिकतरशुभग्रहान्वितत्वान्न्यूनपापकरौ । एवमत्र शुभग्रहैर्युतो लग्नेशस्तथा लग्नगतश्चन्द्रः केन्द्रस्थितोऽतः पूर्वोक्तं पराशरमतमत्र पूर्णायुष्यकारणं दृश्यते । पुनश्चात्र सूर्यकेतू पापाख्यौ षडायगतौ । परमत्रिकोणस्थितः शनिर्गुरुणा दृष्टो नैव तावत्पापकरः । एवञ्च वैद्यनाथोक्तयोगैरपि पूर्णायुष्यलक्षणमत्र द्रष्टुं शक्यते।

४० त्रिलोचनभट्टराईमहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते।

५. ६. शताब्दीपुरुषः सत्यमोहनजोशी–

नेपालदेशस्य सुविख्यातमदनपुरस्कारेण त्रिवारं विभूषितस्य संस्कृतिविदः सत्यमोहनजोशीमहाभागस्य जन्म १९७७ तमे वैक्रमाब्दे वैशाखमासस्य ३० तमे दिवसे बुधवासरे ज्येष्ठकृष्णपक्षे नवमीतिथौ शतभिषङ्नक्षत्रे सूर्योदयाद् गतघट्यादिषु २४।०८ कन्यालग्ने मेषनवांशे पाटननगर्यामभूत् ।[४१] वयसा महाभागैः सम्प्रति साग्रैकशतवर्षाणि व्यतियापितानि ।

लग्नकुण्डली



नवांशकुण्डली



तत्रभवतो जोशीमहाभागस्य जन्मकुण्डल्यामष्टमभावो विचारणीयो वर्तते। तत्र चत्वारो ग्रहाः सन्ति। लग्नेशाष्टमेशौ बुधकुजावन्योन्याश्रयस्थौ। निधनेऽपि बुधयुतेषु सूर्यशुक्रकेतुष्वपि किञ्चिन्मारकाख्यदोषो दृश्यते। तेन 'लग्नगे निधनाधीशे निधने लग्नपे यदि, मारकग्रहसंयोगे जातो भवति निर्धनः।' (भावकुतूहलम् १४।२८) इत्युक्त्वात् तत्रभवतो जीवने प्रचुरधनाभावो दृश्यते। अत्रान्येऽपि विचारणीयाः सन्ति केचिद् विघ्नकर्तारो योगाः शास्त्रसम्मताः।

रन्ध्रेऽङ्गेशे पापयुतदृष्टे तुर्यमासायुः ॥ (जातकतत्वम् २।८१)
षष्ठाष्टरिष्फगतश्चन्द्रः क्रूरैः खेटैश्च वीक्षितः।
जातस्य मृत्युदः सद्यस्त्वष्ट वर्षैः शुभेक्षितः ॥ (बृहत्पाराशरहोराशास्त्रम् १०।२)

त्रिकोणे पापनिर्मुक्ते केन्द्रे सौम्यविवर्जिते।
रन्ध्रे पापविहीने च जातस्त्वमरसन्निभः ॥ (जातकपारिजातः ४।१००)

अत्र सामान्यनियमेषु दीर्घायुष्यकारणं सहसा न दृश्यते । परन्त्वत्रैवानेकयोगलक्षणानि शास्त्रानुमोदितानि सन्ति। अतोऽत्र विशेषयोगान्वेषणं करणीयम्। जन्मकुण्डलीविश्लेषणादेव दीर्घायुष्यलक्षणमत्र द्रष्टुं शक्यते। महर्षिपराशरप्रणीतसूत्रानुसारेण

४१ सत्यमोहनजोशीमहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते।

तृतीयाष्टमस्थानेशावेवायुष्याधिपौ।[४२] अत्र भौम एव द्वयोरपि स्थानयोरधिपः। तेनात्राऽऽयुषः स्वामी भौमः। एवमेव शरीरवाचकं लग्नम्। लग्नेशो बुध एव कर्मस्याप्यधिपतिः। अत्र शरीरायुष्याधिपती कुजबुधावन्योऽन्याश्रयसंस्थितौ सम्बन्धयुक्तौ स्तः। आयुष्याधिपतिः कुजः स्वगृहेऽष्टमस्थाने पूर्णदृष्ट्या पश्यति। 'यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्यतस्यास्ति वृद्धि'रिति पृथुयशोवचनात् कुज एव निजपापस्वभावं परित्यज्याप्यायुष्यरक्षको भवेदित्यत्र न कोऽपि सन्देहः। उक्तं च केनापि– 'अष्टमाधिपतौ केन्द्रे पूर्णायुर्योगभाग्यवान्'[४३] इति। पुनश्च 'शतं जीविनो रन्ध्रगे राजपुत्र]'[४४] इति भट्टनारायणवचनादष्टमस्थो बुधोऽपि शतायुष्यं प्रददाति।

वैद्यनाथमतेनात्राष्टमस्थानस्थितेषु ग्रहेषु मध्ये सूर्यः स्वोच्चराशौ व्यवस्थितो वर्तते। लग्नेशो बुधोऽपि स्वोच्चांशस्थितो बलवानेव। शुक्रकेतू भावाधिपेन दृष्टौ बलसम्पन्नावेव। एवमत्राष्टमे त्र्याधिका ग्रहाः सबलास्तेन 'रन्ध्रे स्थितैस्त्रिभिः खेटैर्लग्नरन्ध्रेशसंयुतैः। रन्ध्रे पापविहीने च दीर्घमायुर्विनिर्दिशेत्॥'[४५] इत्युक्तेश्चाभिप्रायोऽत्र दीर्घायुष्यकारणम्। एवञ्चाष्टमेशो भौमस्तद्व्यवस्थितो भावः प्रथमस्तत्र कन्याराशिः। कन्याधिपतिर्बुधोऽष्टमे तस्य स्वामी भौमश्च केन्द्रे व्यवस्थितो वर्तते। योगेऽस्मिन्नपि दीर्घायुष्यलक्षणं वैद्यनाथसम्मतम्। तथा च– 'रन्ध्रेशस्थगृहाधीशो यस्मिन् राशौ व्यवस्थितः। तदीशो लग्ननाथश्च केन्द्रगो यदि तादृशम्॥'

अत्र मारकाणां प्राबल्येन परस्परसम्बन्धो नास्ति। लग्नरन्ध्रेशौ अन्योऽन्याश्रयसंस्थितौ स्तः। अस्य कुण्डल्यां मारकेशो बृहस्पतिः। परञ्चात्र स्वकीयनवांशस्थितः सन् बृहस्पतिः लाभस्थाने (उपचयस्थाने) दुःसम्बन्धैर्विना स्वोच्चराशौ स्थितोऽस्ति। अतस्तेनापि 'सुयोगैर्वर्धते ह्यायुः' इत्युक्तेश्चाभिप्रायस्तत्रभवतो जन्मकुण्डल्यध्ययनेन प्रमाणतया सिद्ध्यति। अल्पेनाऽपि दैन्येन रहितः जोशीमहाभागः अद्यतनकालेऽपि निजकार्येषु सामाजिककार्येषु च समर्थोऽस्ति।

५. ७. शतायुष्मान् भीमप्रसादबरालः–

शतायुषो भीमप्रसादबरालमहोदयस्य जन्म नेपालदेशे मेच्यञ्चलान्तर्गतस्ताप्लेजुङमण्डलस्य दोखुग्रामे १९७८ तमे वैक्रमाब्दे पौषमासस्य १४ दिनगते सूर्योदयादिष्टघट्यादिषु ३३।०२ पौषकृष्णपक्षे चतुर्दश्युपर्यमायां तिथौ ज्येष्ठोपरि मूलनक्षत्रेऽभूत्।[४६] सम्प्रति महाभागोऽयं झापामण्डलस्य मेचीनगरे इट्टाभट्टाख्यस्थाने निवसति।

---

४२ अष्टमं ह्यायुषः स्थानमष्टमं च यत्। तयोरपि व्ययस्थानं मारकस्थानमुच्यते॥ लघुपाराशरी ३।१।

४३ वृजेशकुमार शुक्ल, ज्योतिर्विज्ञानसन्दर्भसमालोचनिका, देवकेरलोक्तवाक्यम्, पृ. ४४१।

४४ चमत्कारचिन्तामणिः, पूर्ववत्, पृ. २४१।

४५ जातकपारिजातः, अरिष्टाध्यायः श्लो. ८७।

४६ भीमप्रसादबरालमहोदयस्य जन्मविवरणं तदीयजन्मकुण्डलीतः गृहीतं वर्तते।

लग्नकुण्डली



नवांशकुण्डली



अस्य महाभागस्य जन्मकुण्डल्यां जातकशास्त्रोक्तं योगजं नैव तावद्दीर्घायुष्यलक्षणं सहसा दृश्यते । लग्नेशश्चन्द्रोऽयमायां जन्मत्वेनास्तंगतः क्षीण एव । पुनश्चायं दुःस्थानाख्ये षष्ठस्थाने विराजमानोऽस्ति । अस्य दशमेशः कुजश्चतुर्थे नातिबलवान् पापग्रहः केन्द्रे चैक एव । योगोऽयमल्पायुष्यदायक एव । परन्त्वत्र सूर्यबुधशुक्राश्चन्द्रेणान्विताः । लग्नेशतो राशितश्च सर्वे ग्रहाः केन्द्रस्थिताः सन्ति । योगोऽयमेवात्र विचारणीयो दीर्घायुष्यकारकश्च दृश्यते ।

बरालमहाभागेन न्यायक्षेत्रे संलग्नो भूत्वा समाजस्य सेवा विहिता । महाभागोऽयं यत्नपूर्वकं स्वच्छाहारव्यायामविश्रामादिषु नियमानाचरति । तेनायमल्पेनाऽपि दैन्येन रहितो युवेव निजकार्ये समर्थोऽस्ति ।

५. ८. शतायुष्मती कौशिकादेवीप्रधानः-

काष्ठमण्डपनगर्यां बुद्धनगरस्थाने निवसतः शिवनारायणप्रधानस्य जनन्याः कौशिकादेव्या जन्म १९७६ तमे वैक्रमाब्दे फाल्गुनमासस्य १६ दिनगते फाल्गुनशुक्लपक्षेऽष्टम्युपरिनवमीतिथौ रोहिण्युपरिमृगशिरोनक्षत्रे शुक्रवासरे रात्रिर्गतघट्यादिषु १५।०९ वृश्चिकलग्नोदये सिंहनवांशे ललितपुरनगर्यामभूत् ।[४७] सा २०७५ तमे वैक्रमाब्दे ज्येष्ठमासस्य षोडशे दिवसे दिवङ्गता ।

लग्नकुण्डली



नवांशकुण्डली



४७ कौशिकादेव्याः जन्मविवरणं ज्यो. रतिदेवीजोशीतः प्राप्तं वर्तते ।

अस्यां जन्मकुण्डल्यां लग्नद्रष्टा गुरुः स्वोच्चराशौ स्वनवांशस्थितः सन् बलाधिकोऽस्ति । अनेन दृश्यमानं लग्नमपि बलवानेव । अत्र गुरुशुक्रौ मारकाख्यौ । तयोः सम्बन्धोऽप्यत्र दृश्यते। परन्तु अस्यां कुण्डल्यां गुरुः कारको वर्तते त्रिकोणाधिपत्वात्। लग्नेशभौमोऽपि नवांशकुण्डल्यामुच्चस्थितः बलवान् अस्ति । सौरस्य मारकैः सह सम्बन्धाभावात् तस्याधिकदृष्टिदोषो नास्ति । अत्र लग्नेशो भौमोऽष्टमेशः बुधः । एतौ द्वावप्युत्तरराशिस्थितौ स्तः । तेन जैमिनिमतेनास्यां कुण्डल्यां दीर्घायुष्यं दृश्यते । सा अन्तिमसमयेऽपि स्वकीयकार्येषु शरीरेण मनसा च सामर्थ्यवती आसीत्।

६. निष्कर्षः

अयं खलु मोदावहो विषयो यन्मनुष्याणां सम्प्रत्यायुर्वर्धमानमस्ति। तेन विश्वेऽस्मिन् प्रतिवर्षं वयोवृद्धानां सङ्ख्या वर्धमाना दृश्यते । तथापीह संसारे केवलं भाग्यवन्तो जना एव शतायुष्यं लभन्ते । योगाद्दीर्घायुष्यलक्षणयुक्तजन्मकुण्डलीयुतानां तु दीर्घजीवनं भवत्येव, परन्त्वत्रारिष्टयुक्तसाधारणजन्मकुण्डलीयुतानामपि जीवनं शताधिकं दृष्टमतस्तेन जन्मपत्रिकायां केवलं सामान्ययोगोद्भवस्यायुर्मानस्यैव व्याख्यानमपूर्णं भवेदित्यत्रैव दत्तेनोदारहणेनाऽपि सिद्धयति। अतस्तत्रान्यगणितविधिनाप्यायुष्यगणना करणीया भवति । ततश्चाप्यायुष्यं सम्यङ् न घटति तदा जातकस्य कर्मफलादिष्वप्यायुष्यान्वेषणं करणीयमित्यहं मन्ये।

शतायुष्यं सर्वैरपि मानवैरिष्यत एव। परन्तु तादृशदीर्घजीवनप्राप्तये यौवनकालादेव प्रयत्नः करणीयः।येकर्मयोगादात्मानमुद्धरन्तितेषामायुष्यमपिवर्धतएव।तथैवकर्मणायेचात्मानमवसादयन्ति तेषां दीर्घायुष्यलक्षणयुतानामप्यायुषः क्षयो भवत्येव । यदि देहेऽचिरेण रोगसङ्क्रमणं जायते तदा तेनायुरेव क्षीयते। अकारणं ये क्रुध्यन्ति, भक्ष्याभक्ष्यञ्च नैव विचारयन्ति, कामक्रोधादिविषयेषु रमन्ते, सर्वत्र विपरीतञ्चाचरन्ति तेषां दीर्घायुष्ययोगैरप्यल्पे वयसि निधनं भवत्येव। अत एवारोग्यप्राप्तये नित्यं सर्वैरपि साधना करणीया भवति । जीवनयापने नैकविधावश्यकतापरिपूरणार्थं श्रमपूर्वकं कार्याणि सम्पाद्यन्ते। श्रमेणैव शरीरं दैन्यरहितं सुस्थितं च जायते।

अतो येन कर्मणाचिरेण देहे शैथिल्यं वार्धक्यञ्च नायाति तदेव कुर्यात् । नित्यं हितकरं मात्रानुसारं भोजनं भक्षयेत्। सदा हिताहारविहाराचारादिकर्मसेवनैर्मनुष्याणां स्वास्थ्यरक्षा भवति। त एव नराः शतायुष्यभागिनो भवन्ति।

सन्दर्भविवरणम्

आचार्य, वराहमिहिर : (इ.सं. १९८५), बृहत्जातकम्, प्रथम संस्करण, नयाँ दिल्ली : मोतीलाल बनारसी दास।

आचार्य, वराहमिहिर : (इ.सं. १९९८), लघुजातकम्, वाराणसी : सावित्री ठाकुर प्रकाशन।

ईशादि नौ उपनिषद् (सं. २०७५), शाङ्करभाष्यार्थ– ईशावास्योपनिषद्, तैत्तिरीयोपनिषद्, गोरखपुर : गीताप्रेस।

उपाध्याय, श्री बलदेवजी (वि.सं. २०७३), ऐतरेय आरण्यकमें प्राणविद्या, कल्याण : वेदकथाङ्क, गोरखपुर : गीताप्रेस।

कल्याण : उपनिषद्–अङ्क (वि.सं. २०७२), ईशावास्योपनिषद् , गोरखपुर : गीताप्रेस।

जीवनाथः (सन् १९९२) भावकुतूहलम्, वाराणसी : श्री ठाकुरप्रसाद पुस्तक भण्डार।

झा, डा. सुरकान्त (वि.सं. २०६५), भारतीय कुण्डली विज्ञान, वाराणसी : चौखम्बा संस्कृत सीरीज।

झा, डा. सुरकान्त (वि.सं. २०६५), ज्योतिर्विज्ञानशब्दकोषः, वाराणसी : चौखम्बा कृष्णदास अकादमी।

द्विवेदी, श्रीपारसनाथजी (सन् २०१४) प्रारब्धकर्म एवं ज्योतिषशास्त्र, कल्याण : ज्योतिषतत्वाङ्क, गोरखपुर : गीताप्रेस।

पाठक, महादेवः (सं. १९७२) जातकतत्वम्, भारत : भुवनेश्वरी प्रिन्टिङ प्रेस।

भट्टनारायणः (सन् २०१४), चमत्कारचिन्तामणिः, सम्पादकः ब्रजबिहारीलाल शर्मा, दिल्ली : मोतीलाल बनारसीदास।

मनुस्मृतिः (सन् २०१८), सम्पादकः गंगानाथ झा, दिल्ली : परिमल पब्लिकेशन्स।

महर्षि जैमिनि (वि.सं. २०६१), जैमिनिसूत्रम्, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

महर्षि पराशर : मध्यपाराशरीसहिता 'लघुपाराशरी' व्याख्याकार– सीताराम झा, वाराणसी : मास्टर खेलाडीलाल एण्ड सन्स।

महर्षि पराशर (सन् २०१२), बृहत्पाराशरहोराशास्त्रम्, नई दिल्ली : रंजन पब्लिकेशन्स।

मिश्र, मुकुन्दबल्लभ : (इ.सं. २००४), फलितमार्तण्डः, दिल्ली : मोतीलाल बनारसी दास।

वर्मा, कल्याण (सन् १९८६) सारावली, नयाँ दिल्ली : मोतिलाल बनारसी दास।

वैद्यनाथ (वि.सं. २०५३), जातकपारिजात, वाराणसी : चौखम्बा संस्कृत संस्थान।

शुक्ल, डा. बृजेशकुमार (सन् २०१३) ज्योतिर्विज्ञानसन्दर्भसमालोचनिका, दिल्ली : प्रतिभा प्रकाशन।

शुक्लयजुर्वेदसंहिता (इ.सं. १९७८), सम्पादकः जगदीशलाला शास्त्री, दिल्ली : मोतीलाल बनारसी दास।